# .. pitRistuti ..

# ॥ पितृस्तोत्रं पितृस्तुतिः ॥

## Document Information

Text title : pitRistotram
File name : pitRistotram.itx
Location : doc_deities_misc
Author : Vyasa
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : sansknet
Proofread by : NA
Source : shrIgAruDe mahApurANe adhyAya 89 ruchikRitaM
Latest update : December 12, 2015
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પિતૃસ્તુતિ ॥

શ્રીગારુડે મહાપુરાણે પિતૃસ્તોત્રે રુચિસ્તોત્રં નામ
ઊનનવતિતમોઽધ્યાયાન્તર્ગતમ્ ।

રુચિરુવાચ ।
નમસ્યેઽહં પિતૄન્ભક્ત્યા યે વસન્ત્યધિદેવતમ્ । var દેવતાઃ
દેવૈરપિ હિ તર્પ્યન્તે યે શ્રાદ્ધેષુ સ્વધોત્તરૈઃ ॥ ૧॥ ૧,૮૯.૧૩
નમસ્યેઽહં પિતૄન્સ્વર્ગે યે તર્પ્યન્તે મહર્ષિભિઃ ।
શ્રાદ્ધૈર્મનોમયૈર્ભક્ત્યા ભુક્તિમુક્તિમભીપ્સુભિઃ ॥ ૨॥ ૧,૮૯.૧૪
નમસ્યેઽહં પિતૄન્સ્વર્ગે સિદ્ધાઃ સન્તર્પયન્તિ યાન્ ।
શ્રાદ્ધેષુ દિવ્યૈઃ સકલૈરુપહારૈરનુત્તમૈઃ ॥ ૩ ॥ ૧,૮૯.૧૫
નમસ્યેઽહં પિતૄન્ભક્ત્યા યેઽર્ચ્યન્તે ગુહ્યકૈર્દિવિ ।
તન્મયત્વેન વાઞ્છદ્ભિરૃદ્ધિમાત્યન્તિકીં પરામ્ ॥ ૪॥ ૧,૮૯.૧૬
નમસ્યેઽહં પિતૄન્મર્ત્યૈરર્ચ્યન્તે ભુવિ યે સદા ।
શ્રાદ્ધેષુ શ્રદ્ધયાભીષ્ટલોકપુષ્ટિપ્રદાયિનઃ ॥ ૫॥ ૧,૮૯.૧૭
નમસ્યેઽહં પિતૄન્વિપ્રૈરર્ચ્યન્તે ભુવિ યે સદા ।
વાઞ્છિતાભીષ્ટલાભાય પ્રાજાપત્યપ્રદાયિનઃ ॥ ૬॥ ૧,૮૯.૧૮
નમસ્યેઽહં પિતૄન્યે વૈ તર્પ્યન્તેઽરણ્યવાસિભિઃ ।
વન્યૈઃ શ્રાદ્ધૈર્યતાહારૈસ્તપોનિર્ધૂતકલ્મષૈઃ ॥ ૭॥ ૧,૮૯.૧૯
નમસ્યેઽહં પિતૄન્વિપ્રૈર્નૈષ્ઠિકૈર્ધર્મચારિભિઃ ।
યે સંયતાત્મભિર્નિત્યં સન્તર્પ્યન્તે સમાધિભિઃ ॥ ૮॥ ૧,૮૯.૨૦
નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધૈ રાજન્યાસ્તર્પયન્તિ યાન્ ।
કવ્યૈરશેષૈર્વિધિવલ્લોકદ્વયફલપ્રદાન્ ॥ ૯॥ ૧,૮૯.૨૧
નમસ્યેઽહં પિતૄન્વૈશ્યૈરર્ચ્યન્તે ભુવિ યે સદા ।
સ્વકર્માભિરતૈર્નિત્યં પુષ્પધૂપાન્નવારિભિઃ ॥ ૧૦॥ ૧,૮૯.૨૨
નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધે શૂદ્રૈરપિ ચ ભક્તિતઃ ।
સન્તર્પ્યતે જગત્કૃત્સ્નં નામ્ના ખ્યાતાઃ સુકાલિનઃ ॥ ૧૧॥ ૧,૮૯.૨૩
નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધે પાતાલે યે મહાસુરૈઃ ।
સન્તર્પ્યન્તે સુધાહારાસ્ત્યક્તદમ્ભમદૈઃ સદા ॥ ૧૨॥ ૧,૮૯.૨૪
નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધૈરર્ચ્યન્તે યે રસાતલે ।
ભોગૈરશેષૈર્વિધિવન્નાગૈઃ કામાનભીપ્સુભિઃ ॥ ૧૩ ॥ ૧,૮૯.૨૫
નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધૈઃ સર્પૈઃ સન્તર્પિતાન્સદા ।

તત્રૈવ વિધિવન્મન્ત્રભોગસમ્પત્સમન્વિતૈઃ ॥ ૧૪॥ ૧,૮૯.૨૬
પિતૃન્નમસ્યે નિવસન્તિ સાક્ષાદ્યે દેવલોકેઽથ મહીતલે વા ।
તથાઽન્તરિક્ષે ચ સુરારિપૂજ્યાસ્તે વૈ પ્રતીચ્છન્તુ મયોપનીતમ્ ॥ ૧૫॥ ૧,૮૯.૨૭
પિતૃન્નમસ્યે પરમાર્થભૂતા યે વૈ વિમાને નિવસન્ત્યમૂર્તાઃ ।
યજન્તિ યાનસ્તમલૈર્મનોભિર્યોગીશ્વરાઃ ક્લેશવિમુક્તિહેતૂન્ ॥ ૧૬॥ ૧,૮૯.૨૮
પિતૃન્નમસ્યે દિવિ યે ચ મૂર્તાઃ સ્વધાભુજઃ કામ્યફલાભિસન્ધૌ ।
પ્રદાનશક્તાઃ સકલેપ્સિતાનાં વિમુક્તિદા યેઽનભિસંહિતેષુ ॥ ૧૭॥ ૧,૮૯.૨૯
તૃપ્યન્તુ તેઽસ્મિન્પિતરઃ સમસ્તા ઇચ્છાવતાં યે પ્રદિશન્તિ કામાન્ ।
સુરત્વમિન્દ્રત્વમિતોઽધિકં વા ગજાશ્વરત્નાનિ મહાગૃહાણિ ॥ ૧૮॥ ૧,૮૯.૩૦
સોમસ્ય યે રશ્મિષુ યેઽર્કબિમ્બે શુક્લે વિમાને ચ સદા વસન્તિ ।
તૃપ્યન્તુ તેઽસ્મિન્પિતરોઽન્નતોયૈર્ગન્ધાદિના પુષ્ટિમિતો વ્રજન્તુ ॥ ૧૯॥ ૧,૮૯.૩૧
યેષાં હુતેઽગ્નૌ હવિષા ચ તૃપ્તિર્યે ભુઞ્જતે વિપ્રશરીરસંસ્થાઃ ।
યે પિણ્ડદાનેન મુદં પ્રયાન્તિ તૃપ્યન્તુ તેઽસ્મિન્પિતરોઽન્નતોયૈઃ ॥ ૨૦॥ ૧,૮૯.૩૨
યે ખડ્ગમાંસેન સુરૈરભીષ્ટૈઃ કૃષ્ણૈસ્તિલૈર્દિવ્ય મનોહરૈશ્ચ ।
કાલેન શાકેન મહર્ષિવર્યૈઃ સમ્પ્રીણિતાસ્તે મુદમત્ર યાન્તુ ॥ ૨૧॥ ૧,૮૯.૩૩
કવ્યાન્યશેષાણિ ચ યાન્યભીષ્ટાન્યતીવ તેષાં મમ પૂજિતાનામ્ ।
તેષાઞ્ચ સાન્નિધ્યમિહાસ્તુ પુષ્પગન્ધામ્બુભોજ્યેષુ મયા કૃતેષુ ॥ ૨૨॥ ૧,૮૯.૩૪
દિનેદિને યે પ્રતિગૃહ્ણતેઽર્ચાં માસાન્તપૂજ્યા ભુવિ યેઽષ્ટકાસુ ।
યે વત્સરાન્તેઽભ્યુદયે ચ પૂજ્યાઃ પ્રયાન્તુ તે મે પિતરોઽત્ર તુષ્ટિમ્ ॥ ૨૩॥ ૧,૮૯.૩૫
પૂજ્યા દ્વિજાનાં કુમુદેન્દુભાસો યે ક્ષત્રિયાણાં જ્વલનાર્કવર્ણાઃ ।
તથા વિશાં યે કનકાવદાતા નીલીપ્રભાઃ શૂદ્રજનસ્ય યે ચ ॥ ૨૪॥ ૧,૮૯.૩૬
તેઽસ્મિન્સમસ્તા મમ પુષ્પગન્ધધૂપામ્બુભોજ્યાદિનિવેદનેન ।
તથાઽગ્નિહોમેન ચ યાન્તિ તૃપ્તિં સદા પિતૃભ્યઃ પ્રણતોઽસ્મિ તેભ્યઃ ॥ ૨૫॥ ૧,૮૯.૩૭
યે દેવપૂર્વાણ્યભિતૃપ્તિહેતોર શ્નન્તિ કવ્યાનિ શુભાહૃતાનિ ।
તૃપ્તાશ્ચ યે ભૂતિસૃજો ભવન્તિ તૃપ્યન્તુ તેઽસ્મિન્પ્રણતોઽસ્મિ તેભ્યઃ ॥ ૨૬॥ ૧,૮૯.૩૮
રક્ષાંસિ ભૂતાન્યસુરાંસ્તથોગ્રાન્નિર્ણાશયન્તુ ત્વશિવં પ્રજાનામ્ ।
આદ્યાઃ સુરાણામમરેશપૂજ્યાસ્તૃપ્યન્તુ તેઽસ્મિન્પ્રણતોઽસ્મિતેભ્યઃ ॥ ૨૭॥ ૧,૮૯.૩૯
અગ્નિષ્વાત્તા બર્હિષદ આજ્યપાઃ સોમપાસ્તથા ।
વ્રજન્તુ તૃપ્તિં શ્રાદ્ધેઽસ્મિન્પિતરસ્તર્પિતા મયા ॥ ૨૮॥ ૧,૮૯.૪૦
અગ્નિષ્વાત્તાઃ પિતૃગણાઃ પ્રાચીં રક્ષન્તુ મે દિશમ્ ।

તથા બર્હિષદઃ પાન્તુ યામ્યાં મે પિતરઃ સદા ।
પ્રતીચીમાજ્યપાસ્તદ્વદુદીચીમપિ સોમપાઃ ॥ ૨૯॥ ૧,૮૯.૪૧
રક્ષોભૂતપિશાચેભ્યસ્તથૈવાસુરદોષતઃ ।
સર્વતઃ પિતરો રક્ષાં કુર્વન્તુ મમ નિત્યશઃ ॥ ૩૦॥ ૧,૮૯.૪૨
વિશ્વો વિશ્વભુગારાધ્યો ધર્મો ધન્યઃ શુભાનનઃ ।
ભૂતિદો ભૂતિકૃદ્ભૂતિઃ પિતૃણાં યે ગણા નવ ॥ ૩૧॥ ૧,૮૯.૪૩
કલ્યાણઃ કલ્યદઃ કર્તા કલ્યઃ કલ્યતરાશ્રયઃ ।
કલ્યતાહેતુરન્ઘઃ ષડિમે તે ગણાઃ સ્મૃતાઃ ॥ ૩૨॥ ૧,૮૯.૪૪
વરો વરેણ્યો વરદસ્તુષ્ટિદઃ પુષ્ટિદસ્તથા ।
વિશ્વપાતા તથા ધાતા સપ્તૈતે ચ ગણાઃ સ્મૃતાઃ ॥ ૩૩॥ ૧,૮૯.૪૫
મહાન્મહાત્મા મહિતો મહિમાવાન્મહાબલઃ ।
ગણાઃ પઞ્ચ તથૈવૈતે પિતૃણાં પાપનાશનાઃ ॥ ૩૪॥ ૧,૮૯.૪૬
સુખદો ધનદશ્ચાન્યો ધર્મદોઽન્યશ્ચ ભૂતિદઃ ।
પિતૃણાં કથ્યતે ચૈવ તથા ગણચતુષ્ટયમ્ ॥ ૩૫॥ ૧,૮૯.૪૭
એકત્રિંશત્પિતૃગણા યૈર્વ્યાપ્તમખિલં જગત્ ।
ત એવાત્ર પિતૃગણાસ્તુષ્યન્તુ ચ મદાહિતાત્ ॥ ૩૬॥ ૧,૮૯.૪૮

---

માર્કણ્ડેય ઉવાચ ।
એવં તુ સ્તુવતસ્તસ્ય તેજસોરાશિરુચ્છ્રિતઃ ।
પ્રાદુર્બભૂવ સહસા ગગનવ્યાપ્તિકારકઃ ॥ ૩૭॥ ૧,૮૯.૪૯
તદ્દૃષ્ટ્વા સુમહત્તેજઃ સમાચ્છાદ્ય સ્થિતં જગત્ ।
જાનુભ્યામવનીં ગત્વા રુચિઃ સ્તોત્રમિદઞ્જગૌ ॥ ૩૮॥ ૧,૮૯.૫૦
રુચિરુવાચ ।
અર્ચિતાનામમૂર્તાનાં પિતૃણાં દીપ્તતેજસામ્ ।
નમસ્યામિ સદા તેષાં ધ્યાનિનાં દિવ્યચક્ષુષામ્ ॥ ૩૯॥ ૧,૮૯.૫૧
ઇન્દ્રાદીનાં ચ નેતારો દક્ષમારીચયોસ્તથા ।
સપ્તર્ષીણાં તથાઽન્યેષાં તાન્નમસ્યામિ કામદાન્ ॥ ૪૦॥ ૧,૮૯.૫૨
મન્વાદીનાં ચ નેતારઃ સૂર્યાચન્દ્રમસોસ્તથા ।
તાન્નમસ્યામ્યહં સર્વાન્પિતૃનપ્યુદધાવપિ ॥ ૪૧॥ ૧,૮૯.૫૩
નક્ષત્રાણાં ગ્રહાણાં ચ વાય્વગ્ન્યોર્નભસસ્તથા ।
દ્યાવાપૃથિવ્યોશ્ચ તથા નમસ્યામિ કૃતાઞ્જલિઃ ॥ ૪૨॥ ૧,૮૯.૫૪
પ્રજાપતેઃ કશ્યપાય સોમાય વરુણાય ચ ।
યોગેશ્વરેભ્યશ્ચ સદા નમસ્યામિ કૃતાઞ્જલિઃ ॥ ૪૩॥ ૧,૮૯.૫૫

નમો ગણેભ્યઃ સપ્તભ્યસ્તથા લોકેષુ સપ્તસુ ।
સ્વાયમ્ભુવે નમસ્યામિ બ્રહ્મણે યોગચક્ષુષે ॥ ૪૪॥ ૧,૮૯.૫૬
સોમાધારાન્પિતૃગણાન્યોગમૂર્તિધરાંસ્તથા ।
નમસ્યામિ તથા સોમં પિતરં જગતામહમ્ ॥ ૪૫॥ ૧,૮૯.૫૭
અગ્નિરૂપાંસ્તથૈવાન્યાન્નમસ્યામિ પિતૄનહમ્ ।
અગ્નિસોમમયં વિશ્વં યત એતદશેષતઃ ॥ ૪૬॥ ૧,૮૯.૫૮
યે ચ તેજસિ યે ચૈતે સોમસૂર્યાગ્નિમૂર્તયઃ ।
જગત્સ્વરૂપિણશ્ચૈવ તથા બ્રહ્મસ્વરૂપિણઃ ॥ ૪૭॥ ૧,૮૯.૫૯
તેભ્યોઽખિલેભ્યો યોગિભ્યઃ પિતૃભ્યો યતમાનસઃ ।
નમોનમો નમસ્તેઽસ્તુ પ્રસીદન્તુ સ્વધાભુજઃ ॥ ૪૮॥ ૧,૮૯.૬૦

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રુચિકૃતપિતૃસ્તોત્રં નામૈકોનનવતિતમોઽધ્યાયાન્તર્ગતમ્ ।

From sansknet.org as provided on GRETIL site.

Some consider as two stotras by Ruchi.

.. pitRistuti ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*